© 2019 IJSRSET | Volume 6 | Issue 4 | Print ISSN: 2395-1990 | Online ISSN : 2394-4099
International Journal of Scientific Research in Science, Engineering and Technology

# किरातार्जुनीये सूक्तय:

आचार्या.सि.ललिताराणी
साहित्यविभाग:, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:।

**पत्रसार:** – पञ्चमहाकाव्येषु अन्यतमं किरातार्जुनीयं सर्वाङ्गीणतया कवीनाम् आनन्ददायकमिति नात्युक्ति:। तत्र विद्यमानानि सुभाषितानि आह्लादनेन उपदेशप्रदानक्षमाणि। तेषां परिशीलनम्, नूतनकवीनां मार्गदर्शनाय तथा नूतनतथ्याविष्करणाय च कल्पते। अतोत्र सूक्तीनां समीक्षा विहिता यया सुभाषितविमर्शनमार्गो सुस्पष्टो भवतीति।

कूटशब्दा: – किरातार्जुनीयम्, भारवि:, सुभाषितम्, उपदेश:, महाकाव्यम्।

**1.उपकर्म:** - अस्य महाकाव्यस्य कर्ता भारवि:। काव्येऽस्मिन्नष्टदशसर्गा: षट्त्रिंशदुत्तरैक सहस्रं(1036) श्लोका: विद्यन्ते। वीररसोऽपि प्रधान:। अन्ये अष्टौ रसा: गौणा:। नायको धीरोदात्त: अर्जुन:। प्रतिनायक: किरातरूपी शङ्कर:। अस्य महाकाव्यस्य कथा महाभारतस्य वनपर्वण: गृहीताऽस्ति। भारवेरर्थगौरवेण संस्कृतवाङ्मयनभसि एतन्महाकाव्यं देदीप्यमानं सत् सहृदयविद्वद्वरेण्यानां हृदये अमन्दानन्दं जनयति।

भारवि: मितभाषी इति कथ्यमानोऽपि शब्देषु विशिष्टमर्थं संस्थापयितुं महतीं शक्तिं प्राप्तवान् । येन भारवे: कीर्तिरवि: सर्वथा देदीप्यमान: बभूव। ओजोगुणात्मशब्दगुम्फने भारवे: विलक्षणा प्रतिभा।

तद्यथा –

**स्तुवन्ति गुर्वीमभिधेयसंपदं विशुद्धिमुकतेरपरे विपश्चित:।**
**इति स्थितायां प्रतिपुरुषं रुचो सुदुर्लभा: सर्वमनोरमा गिर:।।**[1]

केचत् अर्थसम्पत्तिं प्रशंसन्ति केचित् शब्दाऽऽडम्बरं वाच्छन्ति। तेन पाठकान् आकर्षयितुं सर्वे न शक्नुवन्ति। परन्तु भारवि: स्वकाव्ये अर्थगौरवम् शब्दसौन्दर्यञ्च उभयमपि समानेन संसाध्य सर्वान् विद्वत्तल्लजान् नन्दयामास।

महाभारतकथास्य महाकाव्यस्याधार:। किरातरूपधारिणा शिवेन सहार्जुनस्य युद्धम्, तदनु ततोऽर्जुनस्य वरप्राप्तिश्चात्र मुख्यं वर्णनीयम्। किरातार्जुनामधिकृत्य कृतं काव्यं किरातार्जुनीयमिति काव्यनामव्युत्पत्ति:। द्यूतनिर्जितेन भ्रातृभि: द्रौपद्या च समं वने निवसता ज्येष्ठपाण्डवेन युधिष्ठिरेण दुयेधनस्य राज्यशासननीतिपरिज्ञानम् गुप्तचररूपेण कश्चिद्वनेचरो राजधानीम् प्रति प्रेषित: तेनागत्य दुर्योधनस्य शासननीतिरेरति प्रशंसा कृता। तस्मिन् वृत्ते भ्रातृणां द्रौपद्याश्च सविधे वर्णितम्। द्रौपदी क्रमेण प्रबलीभवन्त: शत्रव: शीघ्रमेव जेतव्या: न त्वेवमुपेक्ष्या: इति युधिष्ठिरमुत्तेजितवती, तदिदं प्रथमसर्गे गतम्।

**2.किरातार्जुनीयकाव्यशब्दवियुत्पत्ति:-** किरतीति किर: कृ – विक्षेपे इति धातो: इगुपध – इति सूत्रेण कप्रत्यय:, अर्थात् य: शराद्यस्त्रं विक्षिपति अत सातत्यगमने अततीति अत:, अच् प्रत्यय:।

'किरश्च असौ अतश्च' इति किरात:। अर्जुन: मध्यमपाण्डव:। 'किरातश्च अर्जुनश्च' किरातार्जुनौ, तयो: इदमिति किरातार्जुनीयम्, 'छ–प्रत्यय:'। किरातार्जुनीयम् अधिकृत्य कृतं यत् काव्यं तत् किरातार्जुनीयम्।

**3.काव्यकथावस्तु-**किरातार्जुनीयं भारवेरेकमात्रा कृति:। महाभारतस्य वनपर्वस्थं सप्तविंशाध्यायादारभ्य एकचत्वारिंशाध्यायं यावत् वर्णितं कथावस्तु गृहीत्वा स: 1030 श्लोकुयक्तम् अष्टादशसर्गात्मकं किरातार्जुनीयं महाकाव्यं विरचितवान्।

महाभारतयुद्धात् पूर्वं पाण्डवा: कपटद्यूतक्रीडया दुर्योधनेन पराजिता सन्त: वनवासमकुर्वन्। वनवासानन्तरं कौरवपाण्डवयोर्मध्ये युद्धमनिवार्यमिति हेतो: पाण्डवानां पक्षे शिवस्याशीर्वाद: प्राप्तव्य आसीत्। इन्द्रकीलपर्वते अर्जुन: शिवाराधनं कृत्वा तपस्यया तं सन्तोष्य तस्मात् पाशुपतास्रं प्राप्नुयात्। एतदर्थं स: महर्षै: व्यासस्योपदेशेन इन्द्रकीलपर्वतं गच्छति। इन्द्रकीलपर्वते तपस्यन्तमर्जुनं हन्तुं मायावी मूकदानव: शूकररूपं गृहीत्वा समागत:। शिव: एतत् ज्ञात्वा शूकरं मारयितुं कपटकिरातवेषमाधृत्य तत्रोपस्थित:। किरातवेषधारी शिव: अर्जुनश्च शूकरमभिलक्ष्य समकालं शरं तत्यजतु:। अर्जुनस्य शरीरं विभिद्य पृथिव्यभ्यन्तरप्रतिवेशे केवलं किरातस्य शर: शूकरस्य शरीरे लग्न: आसीत्। तं शूरं ग्रहीतुमुभौ विवादं कृतवन्तौ। अन्ततो गत्वा विवादोऽयं युद्धस्य रूपं नीतवान्। किरातार्जुनयमहाकाव्यस्य पञ्चदशसर्गे शिवार्जुनयो: युद्धं सविस्तरं भारविणा वर्णितमस्ति। युद्धे अर्जुनस्य वीरत्वं साक्षादनुभूय स्वयं शिवा: आत्मरूपं प्रकटयामास। एतत् भवति किरातार्जुनयमहाकाव्यस्य संक्षिप्तं विषयवस्तु। सर्गस्यारम्भपद्ये यथा भारवि: श्रीशब्दं व्यवहृतवान् तथा शेषपद्येऽपि श्रीशब्दस्य पर्यायवाचकं लक्ष्मीपदं व्यवहृत्य सर्गं समापयति। आरम्भपद्यं तथा

**श्रिय: कुरूणमधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम्।**

**स वर्णिलिङ्गी विदित: समाययौ युधिष्ठिरं द्वैतवने वनेचर:।।**[ii]

वर्णिर्लिङ्गरूपेण प्रेषित: गुप्तचर: कौटिल्यरचितार्थशास्त्रदृष्ट्या कापटिक: भवति। कौटिल्यस्यार्थशास्त्रानुसारेण गुप्तचरा: नवप्रकारा: भवेयु: यथा – 1.कापटिक:, 2.उदासीनसन्यासादि:, 3.गृहस्थ:, 4.वैदेहक:(व्यवासायी), 5.तपस्वी, 6.सत्री शास्त्रज्ञगुप्तचर:, 7.तीक्षण: (साहसी), 8.रसद:(विषदायी), 9.भिक्षुकी.

**कापटिकस्य लक्षणं यथा – परमर्मज्ञ: प्रगल्भ: छात्र: कापटिक:।**[iii]

युधिष्ठिरप्रेरित: वनेचर: दुर्योधनस्य किञ्चितत्यं विदित्वा युधिठिरस्य निकटे अविकलमुपस्थापयति। अस्मिन् प्रसङ्गे वनेचर: कथयति[iv] –

**कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना।**

**विभज्य नक्तन्दिवमस्तन्द्रिणा वितन्यते तेन नयेन पौरुषम्।।**

कवेरभिप्रायोऽयं यत् दुर्योधन: कामक्रोधादीन् षट् अरीन् विजित्य नक्तं दिवा च आलस्यरहित: कुर्वन् स्वपौरुषं वर्धयति। दुयोधनस्य राज्यशासने कामादीनां जयत्वमिति भारविणा यत् लिखितम्, तत्र कौटिल्यस्य अर्थशास्त्रस्य प्रभाव: पतित: दृश्यते।[v]

चाणक्यसूत्रमपि एतद्द्दढयति यथा –

तस्मादरिषड्वर्गत्यागनेन्द्रियजयं कुर्वीत । इति भागवता कौटिल्येन अर्थशास्त्रस्य प्रथमाधिकरणे 7 माध्याये प्रथमसूत्रे उट्टङ्कितम्। योगे प्रवीण: कश्चित् एकलयेन तप: साधयेत्। अत: महर्षि: व्यास: अर्जुनाय योगविद्यामर्पयामास। किरातार्जुनीये यथा –

**योगं च तं योग्यतमाय तस्मै**

**तप: प्रभावाद् विततार सद्य:।**

**येनास्य तत्त्वेषु कृतेऽवभासे**

**समुन्मिमीलेव चिराय चक्षु:।।**[vi]

योगदर्शनस्य समाधिपादस्य 48 अनुसारेण कश्चित् यदि समाधौ सिद्धिं लभते तर्हि तस्य ऋतम्भरा प्रज्ञा सिद्धयति। अनया प्रज्ञया सर्वेषां पदार्थाना वास्तविकं तत्त्वम् अनायासेन स जानाति। अर्जुन: अपि एवं ज्ञानं लभतामित्युद्दिश्य व्यास: योगदर्शनं तस्मै प्रददौ। एतेन योगदर्शनस्य प्रभाव: भारवौ पतित: इति ज्ञायते। संख्यादर्शनानुसारेण य: चतुर्विंशतितत्त्वेषु ज्ञाता भवति स: आध्यात्मिकानां तत्त्वानामभिज्ञो भवति।

**4.भारवेरर्थगौरवम् –** भारविः किरातार्जुनीये केषुचित् स्थलेषु एवं रूपेण शब्दप्रयोगं करोति, यत्र स्वल्पशब्दप्रयोगात् भावगम्भीरपूर्णः विशालोऽर्थः प्रकाशितो भवति। एतादृशस्थलानि अर्थगौरवस्य इति कथ्यते। अल्पशब्दप्रयोगेण बहुर्थ प्रकाशः किरातार्जुनीये एव द्रष्टुं शक्यते। अतः उक्तमस्ति –

**उपमा कालिदासस्य भारवेरर्थगौरवम्।**

**दण्डिनः पदलालित्यं माघे सन्ति त्रयोगुणाः।।**

अर्थस्य गौरवम् अर्थगौरवम्। किरातार्जुनीयस्य चतुर्दशसर्गे महाकविः भारविः एतादृशी सूचनां ददाति। वराहमारणानन्तरं कपटशिवप्रेरितः कश्चित् वनेचरः उद्धतवचनमर्जुनं प्रति श्रावयति[vii] ततः चतुर्दशसर्गारम्भे किरातस्य उद्धतवचनैः पीडितोऽपि अर्जुनः धैर्यं न तत्याज। सः शान्तः सन् वनेचरकिरातं प्रशंसन् कथयति –

**विविकतवर्णाभरणा सुखश्रुतिः प्रसादयन्ती हृदयान्यपि द्विषाम्।**

**प्रवतर्त नाकृतपुण्यकर्मणां प्रसन्नगम्भीरपदा सरस्वती।।**[viii]

अत्र भारविः स्पष्टतया प्रतिपादयति यत् ये तावत् पुण्यकर्माणः, सुकृतशालिश्च सन्ति तेषां निकटं सर्वदा एतादृशी प्रसन्न गम्भीरपदा सरस्वती आयाती। या भारती विविक्तवर्णाभरणा अर्थात् दीर्घसमाससंयोगवर्णरहितत्वात् आभरणवत् मनोज्ञा भवति।

महाकविना श्रीमता भारविणा रचिते किरातार्जुनीयमहाकाव्ये अष्टादश सर्गः सन्ति।

**5.सूक्तयः -**

**हितं मनोहारि च दुर्लभं वचः।**[ix]

यतो जगत्यस्मिन् किमपि वचनं नास्ति यत् सर्वदा ‘हितं मनोहारि’ च भवेत् मया यदुच्यते तत् यद्यपि तवहितं भवति तथापि ते मनोहारि न भवेत्।

**अर्थात् वचनं सर्वदा हितकारि अपि च मनोहारि न भवेत्।**

**सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसंपदः।।**[x]

यः प्रभुः सदुपदेशं मित्रात् न शृणोति स क्रमशः किं सखा किं प्रभुश्च भवति। यदि उभयोः मध्ये आनुकूल्यं तिष्ठति तर्हि सर्वसंपदः तत्र विराजन्ते।

**वरं विरोधोऽपि समं महाकविभिः।**[xi]

अत्र वनेचरः युधिष्ठरस्य निकटे दुर्योधनस्य चतुरतपूर्णराज्यशासनप्रणालीं प्रकाशयति। सः कथयति हे श्रीमन्। दुर्योधनः भवतः राज्यशासनापेक्षया अधिकस्वच्छतरेण मार्गेण राज्यशासनं कृत्वा प्रजानां मनः सुवनम् भवन्तं जेतुमिच्छति। अपि च अनार्थ्यसंगापेक्षया भवता सह विरोधं श्रेयस्करं मनुते। यतो हि लोके प्रसिद्धिरस्ति दुर्जनसंगापेक्षया महात्मभिः साकं शत्रुता वरम्।

**सं चिन्तयत्यैव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता।।**[xii]

**महद्भिः सह विरोधिता दुरन्तेति या सूक्तिः विद्यते सा यर्थाथैव।**

विचित्ररूपाः खलु चित्तवृत्तयः।[xiii]

वस्तुतः मनुष्याणां चित्तवृत्तिः विचित्ररूपा। कदा किं कर्तृ सा मनुष्यं प्रेरयति तत् ज्ञातुं न शक्यते।

अत्र कथितमस्ति विपश्चितः वक्तुविशेषं प्रतिध्यानवन्तो न भवन्ति परन्तु वचने गुणग्राहिणः भवन्ति। इयमेव अर्थान्तलन्यासमाश्रित्यात्र सूक्तिः वर्तते। युधिष्ठरः द्रैपदीभीमौ सान्त्वयन् कथयति –

मया युवयोः वचनं श्रुतम्। परन्तु युवयोः वचनानुसारेण सहसा न विधातव्यम्। सहसा किञ्चित् कार्यकरोति तं सर्वदा सर्वसंपदः वृणते। अमूल्य सूक्तिरिदं –

**सहसा न विदधीत क्रियामविवेक: परमापदाम् पदम्।**

**वृणते हि विमृश्यकारिणं गुणलुब्धा: स्वयमेव संपद:।।**[xiv]

**स जगदे वचनं प्रियमादरात् मुखरताऽवसरे हि विराजते।**[xv]

समीचीनसमये कस्यापि मुखरता शोभते।

इयं भवति सूक्ति:। हिमालयस्य शोभया विस्मितमानसमर्जुनं स: किञ्चिदुक्तवान्।

**रूजन्नपि महते गुणाय महान्** [xvi]

अत्र तात्पर्यमिदं यत् महतां प्रकृतिरेतादृशी यत् ते पीडिता अन्येषां महदगुणेत्पादनाय अलं भवति।

**मधुरा यौवनश्री: मनो हरति।**[xvii]

मयूराणां निनाद: अपि मनोविकारं सृजति।

**श्रेयसी तव संप्राप्तामगुणसंपदमाकृति:**

**श्रेयसीं गुणसंपदं तव आकृति: प्राप्तोति।**[xviii]

**सज्जनोऽसि विजहीहि चापलं**

**सर्वदा क इव वा सहिष्यते।।**[xix]

**नातिपीडयितुं भग्नानिच्छन्ति हि महौजस:।**[xx]

महापराक्रमिण: संग्रामे भग्नान् सैनिकान् अतिपीडयितुं नेच्छन्ति।

**उपसंहार:-**अष्टादशसर्गात्मके महाकाव्ये भारविणा समाजोपयोगिनीनां सूक्तीनां सुष्ठु गुम्फिनं विहितम्। किरातार्जुनीयं सार्वकालिकं समाजोपयोगिता भवति इति वक्तुं नास्ति संशीतिलेश: इति। सूक्तय: मनोविकासप्रदर्शनादर्शा भवन्ति। प्रतिभादारिद्र्यवतां सूक्तिर्न जायते। सूक्तयो हि कवे: प्रतिभां प्रकाशयन्ति। तादृशरीत्या महाकविरयमिति सूक्तिपरिशीलनेनैव अवगन्तुं शक्यते।

**उपयुक्तग्रन्थसूची –**

1.कौटिलीययार्थशास्त्रम् (कौटिल्य) - वाचस्पति गौरोला, चौखम्बा विद्या भवन, वाराणसी, 2003.

2.किरातार्जुनीयम् (महाकवि भारवी) - डा.कान्ता भाटिया, डा.अमलधारी सिंह, भारतीय विद्या प्रकाशन, वाराणसि, 2007

3. महाभारतम् - सम्पादक: -प्रो.आर्.एन्.दण्डेकर:, भण्डारकर रिसर्च इन्सटिट्युट्,पुने,समस्करणम्-1961.

## सन्दर्भसूची

1. किर.24-4

ii. कि.रा.9-श्लो.9पु.19

iii. कौटिल्यार्थशास्त्रम् -अ.धि.2,अ.11.सू.3

iv. 1-9

v. कौटिल्यार्थशास्त्रम्- 1-6 अध्याय:

vi. कि.3-26

vii. 2,3 सर्ग:
viii. किरा.24-3
ix. किरा-1-4
x. किरातार्जुनीयम् 1.5.
xi. किरातार्जुनीयम् 1.8
xii. किरातार्जुनीयम् 1.23
xiii. श्लोक - 1-38
xiv. 2.30
xv. 5-16
xvi. 6-7
xvii. 10-17
xviii. 11-11
xix. 2-3-66
xx. 15-6